Ganesha Pancharatnam

गणेशपञ्चरत्नस्तोत्रम्

NityaPaath
nityapaath.com/ganesha-pancharatnam/

SHLOKA · श्लोक

1 मुदा करात्तमोदकं सदा विमुक्तिसाधकं
कलाधरावतंसकं विलासिलोकरञ्जकम्।
अनायकैकनायकं विनाशितेभदैत्यकं
नताऽशुभाऽऽशुनाशकं नमामि तं विनायकम्॥ १॥

2 नतेतरातिभीकरं नवोदितार्कभास्वरं
नमत्सुरारिनिर्जरं नताधिकापदुद्धरम्।
सुरेश्वरं निधीश्वरं गजेश्वरं गणेश्वरं
महेश्वरं तमाश्रये परात्परं निरन्तरम्॥ २॥

3 समस्तलोकशङ्करं निरस्तदैत्यकुञ्जरं
दरेतरोदरं वरं वरेभवक्त्रमक्षरम्।
कृपाकरं क्षमाकरं मुदाकरं यशस्करं
मनस्करं नमस्कृतां नमस्करोमि भास्वरम्॥ ३॥

4 अकिञ्चनार्तिमार्जनं चिरन्तनोक्तिभाजनं
पुरारिपूर्वनन्दनं सुरारिगर्वचर्वणम्।
प्रपञ्चनाशभीषणं धनञ्जयादिभूषणं
कपोलदानवारणं भजे पुराणवारणम्॥ ४॥

5 नितान्तकान्तदन्तकान्तिमन्तकान्तकात्मज-
मचिन्त्यरूपमन्तहीनमन्तरायकृन्तनम्।
हृदन्तरे निरन्तरं वसन्तमेव योगिनां
तमेकदन्तमेव तं विचिन्तयामि सन्ततम्॥ ५॥

PHALASHRUTI · फलश्रुति

6 महागणेशपञ्चरत्नमादरेण योऽन्वहं
प्रगायति प्रभातके हृदि स्मरन् गणेश्वरम्।
अरोगतामदोषतां सुसाहितीं सुपुत्रतां
समाहितायुरष्टभूतिमभ्युपैति सोऽचिरात्॥ ६॥

Text checked against: Brihat Stotra Ratnakar (सर्वविधदेवानां स्तोत्रसंग्रहः, 442 stotras), ed. Shivdutta Mishra Shastri, Thakur Prasad & Sons, Varanasi, 4th edition Samvat 2042 (1985); no. 11. Meanings, audio and all scripts at nityapaath.com/ganesha-pancharatnam/